
अक्टूबर २०१७
(आश्विन शु० एकादशी तः कार्तिक शु० एकादशी पर्यन्तम्)

ISSN: 2347-1565
मूल्यम् : २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम् ५ अङ्कः ३



सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

ISSN : 2347-1565 मूल्यम् ₹ २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ अक्टूबर २०१७ अङ्कः-३

(आश्विन शु० एकादशी तः कार्तिक शु० दशमी पर्यन्तम् वै. २०७४)


| क्र.सं. | अनुक्रमणिका | | पृ.सं. |
|---|---|---|---|
| | सम्पादकीयम् | डॉ० जीतराम भट्टः | |
| १. | सेवनीया संस्कृता श्रेष्ठभाषा | डॉ० कैलाशनाथ द्विवेदी | १ |
| २. | 'सहिष्णुता' इति किम्? | कृष्णप्रसाद उपाध्यायः | ३ |
| ३. | शङ्करभारतीमुक्तावली | अंकुरनागपालः | ५ |
| ४. | व्यर्थजिज्ञासा | राहुल कौशिकः | ८ |
| ५. | आगच्छ त्वं पठनम् | मोती प्रसाद साहू | ९ |
| ६. | ध्यानस्य लाभानाञ्च विवेचनम् | विवेक शर्मा | १२ |
| ७. | श्रीमद्भगवद्गीतायां योग-विज्ञानस्य स्वरूपविमर्शः | गोविन्ददासः | १७ |


सम्पादकः :- डॉ0 जीतराम भट्टः

सहायकसम्पादकः :- प्रद्युम्नचन्द्रः

दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELHI)

**प्रकाशकः**

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

ISSN : 2347-1565

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (**दिल्लीसंस्कृतअकादमीपक्षे**)

Mode of payment:

Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com
Website : www.sanskritacademy.delhi.gov.in

मुद्रकः

**एस.डी.एम. प्रिन्टर एण्ड पैकर**

हरिनगरम्, नव देहली-110064

मो. : 9811229529

# सम्पादकीयम्

लोके बालानां कृते बहुधा मातापितरश्चिन्तिता एव भवन्ति। शिक्षायै वृत्त्यै संस्कारेभ्यश्च तेषां प्रयासो भवति यत्तेषां बालाः समाजे शीर्षस्थाः स्युः। समाजोऽनुकरणशीलोऽस्ति। यादृशी प्रवृत्तिश्चलति तामनुसृत्यैव जनाः स्वबालान् प्रेरयन्ति। चिकित्सक-वृत्यै प्रबन्धकाजीविकायै तथाभियन्तृ-वृत्यै च बालान्नभिप्रेरयन्ति किन्तु मानवोचितसंस्काराणां संस्थापनाय संस्कर्तुं बालान्नेव बोधयन्ति। विद्यालयेष्वपि केवलं वृत्तिप्रधानैव शिक्षा मुख्या। नास्ति तत्र 'मनुर्भव' इति शिक्षयितृविद्यायाः प्राधान्यम्। आग्लभाषायां विरचितया विद्ययान्यासुभारतीयभाषाष्वपि लिखितैः ग्रन्थैरपि। तादृशः संस्कारः नैव भवति। यदि चेद् बालाः योग्याः चिकित्सका अभियन्तारः प्रबन्धकाः वा भवेयुस्तर्हि योग्याः नागरिका अपि भवेयुः योग्याः मानवाः योग्याः पुत्राः भ्रातरोऽपि भवेयुः। पाठ्यक्रमेण सह मानवव्यवहृतेरपि शिक्षा प्रदेया। सभ्यनागरिकाणां निर्माणाय बालानां शिक्षायै गाम्भीर्यमावश्यकम्। अतः संस्कृतशिक्षायै निवेदयत्यं जनः।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका॥**

**निवेदकः**
**डॉ. जीतरामभट्टः**
**सचिवः**

# सेवनीया संस्कृता श्रेष्ठभाषा

- डॉ० कैलाशनाथ द्विवेदी

सुकविमुनिजनैर्या, वेदभाषा प्रयुक्ता,
अभिनवनिधिरूपा, ज्ञान-विज्ञानराशेः।
अविदितमिह तत्त्वं, ब्रह्मणो किं जगत्यां
सकलबुधजनैः सा, सेवनीया सुभाषा।। १।।

रघुकुल कलकीर्त्तिं, कीर्त्तयन् संस्कृते यः,
लव-कुशसदृशं वै, शिक्षयन् शिष्यवृन्दम्।
विमलनृपचरित्रं, चित्रितं रामकाव्ये,
जयतु जगति ज्येष्ठो, बाल्मीकिः कवीन्द्रः।। २।।

कुरुकुलकलगाथां, चित्रयन् चारुकाव्ये,
सुखदभगवद्गीतां, कृष्ण-वाण्या च गीत्वा।
सुमधुरसुरवाणीं,श्रद्धया सेवमानः,
जगति मुनिवरः सः, व्यासनाम्नो महात्मा।।३।।

भुवनविदितहासो, भासते भासरूपे,
कविकुलगुरुभूतः कालिदासः प्रसिद्धः।
ललितपदनियोगे, गीतगोविन्दकारः,
सकलकविजनैर्या श्रद्धया सेविताऽभूत।।४।।

निखिलकविकुलं सेवस्व गीर्वाणवाण्या:,
अविदितरचना किन्नु ह्यमीषां कवीनाम्।
सुविदितकलकीर्त्तिर्दण्डिवाणादिभिश्च,
सुफलितसुरवाणी, सर्वभाषासु मध्ये।।५।।

अविकलनिधिभूता, ज्ञान-विज्ञानराशे:,
सकलरसयुता या, काव्यधारानुगीता।
सुरसरिसमसेव्या, संस्कृता श्रेष्ठभाषा,
भरतभुवि समृद्धा भारती भारतानाम् ।। ६।।

न खलु न खलु सेव्य:, संस्कृताशून्यदेश:,
न खलु न खलु गेयं देवभाषा विहीनम् ।
सुविदितसुरभाषा शिक्षणीया सदैव,
विरहितसुरवाणी, स्वर्गभूमिर्न सेव्या।। ७ ।।

जयतु जयतु भव्या संस्कृता-विश्वभाषा,
जयतु जयतु दिव्या संस्कृतेर्प्राणधारा।
जयतु जयतु ज्योतिर्जन्मिनामार्यजाते:,
जयतु च सुरवाणी भारती भारतानाम्।। ८ ।।

संस्कृत-दिवसे सम्या:, स्मरन्ति सुरभारतीम्।
प्रयोगे चेद् भवेनिन्त्यं, भूयात् भास्वर-भारतम्।। ९।।

**-पूर्व प्राचार्य:,**
**'कुसुम कुलाय', सूर्यनगरम्**
**अजीतमल ( औरैया )**
**उत्तर प्रदेश: २०६१२१**

# 'सहिष्णुता' इति किम्?

– कृष्णप्रसाद उपाध्यायः

सम्प्रति आदेशे सहिष्णुताऽसहिष्णुतायाः चर्चा बलवती अस्ति। अतः विशेषतया अत्र शब्दोऽयं 'सहिष्णुता' इति विचारणीयः। एतस्यास्याऽर्यावर्तदेशस्य वहव्यः विशेषताः सन्ति। यथा-वेदेषु आस्था, ईश्वरभक्तिः, पुरुषार्थचतुष्टयस्य धारणा, आश्रमचतुष्टयस्य व्यवस्था, वेशभाषाऽशनोपासनाष्द्धतिदृष्ट्या भिन्नता, सहैव एतस्य देशस्य संस्कृत्याः च विशेष-विशेषता वर्तते सहिष्णुता।

एतस्य देशस्य प्राक्तनवासिनः साहिष्णवः आसन्। अत्र ये केऽपि वैदेशिकाः आगताः सर्वेऽपि समादृताः अनेन देशेन, भवतु नाम ते परं लुण्ठकाः गजनीबर्बरसदृशाः स्युः उतोवा आंग्लीयाः वञ्चकाः स्यु। अनेन देशेन कस्यापि राष्ट्रस्य उपरि अनधिकारचेष्टा न विहिता रामकृष्णदुष्यन्त भरतमहावीर-चन्द्रगुप्त-अशोकसदृशाः राज्ञः आसन् वशिष्ठसन्दीपाचाणक्यसदृशाः कूटनीतिज्ञाः विद्वांसः आसन् पुनरपि अनेन राष्ट्रेण कस्यचिदुपरि अपि आक्रमणं कृत्वा असहिष्णुता न परिवर्धिता। पुनः किमर्थं सम्प्रति कोलाहलं वरिवर्धते। वस्तुतः सहिष्णुता इति किं भवति प्रायः जनाः न जानन्ति। यत् स्वाभाविकतया सामान्यरूपेण असह्यं भवति तस्यां परिस्थितौ भातृत्वभाववर्धनाया सहनस्य भावोत्पादः सहिष्णुतेति कथ्यते। अस्मिन्नेव सन्दर्भे स्वतन्त्रतास्वच्छन्दतयोः अपि कोऽर्थः इति जानीयात्। सामान्यजीवनयापनाय आवश्यकी स्वतन्त्रता 'स्वतन्त्रता' कथ्यते। यदा स्वकीय-जीवन स्वकीयाय परकीयायाः स्वतन्त्रतायाः हननं भवति, तदा उच्यते ' स्वच्छन्दता'। स्वकीयायाः स्वतन्त्रतायाः हानिं विनैव परस्य व्यवहारवैविध्यस्य

सहनं 'सहिष्णुता' इति उच्यते। किन्तु यदा स्वात्भानुतोषयं परस्य स्वतन्त्रतायाः हननं भवति तदा हन्ता 'असहिष्णुः' इति कथ्यते।

अतः स्वाभिमानस्य हानिः विनैव अन्येषां स्वागतं करणीयम्, अपितु अवश्यमेव करणीयम्। स्वाभिमानस्य हानिः पुरस्सरं कृतस्य सहिष्णुतायाः नाम भीतिः कायरतेति। एतदर्थं वयं सहिष्णवः स्याम। कायराः नं एतद्धिकं भारतीय-सहिष्णुतायाः का चर्चा यत्र वयं वच्मः यत्-

**वसुधैव कुटुम्बकम्।।**

**- राजकीय प्रतिभा विकास विद्यालयः**
**बी ई ब्लॉक, हरिनगरम्,**
**नव देहली -११००६४**

# शङ्करभारतीमुक्तावली

- अंकुरनागपालः ( सङ्कलकः )

१. सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयः गीतानां मोक्षधर्मणां चैवं परत्वम्। (ई०भा०१)

२. मन्त्रा आत्मनो याथात्म्यप्रकाशनेन आत्मविषयं स्वाभाविककर्मविज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्ति। ।।( ई०भा०१)

३. ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन् प्रत्यगात्मतया। तेन स्वेन रूपेणात्मना ईशा वास्यम् आच्छादनीयम्। (ई०भा०१)

४. यथा चन्दनागर्वादेरुदकादिसम्बन्धजक्लेदादिजनौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाच्छाद्यते स्वेन पारमार्थिकेन गन्धेन, तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतयरूपमुपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्। (ई०भा०१)

५. ईश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रसंन्यासे एवाधिकारो न कर्मसु। (ई०भा०1)

६. कस्य स्वित्कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीः। (ई०भा०1)

७. आत्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतया आत्मा रक्षितव्यः। (ई०भा०1)

८. ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यम् । इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्चतयोः संन्यास एवातिरेचयति। (ई०भा०२)

९. ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि। अदृधेन अदर्शनात्मकेनाज्ञानेन तमसा आवृताः आच्छादिताः। तान् स्थावरान्तान्, प्रेकत्य त्यक्त्वेमं देहम् अभिगच्छन्ति यथाकर्म यथाश्रुतम्। (ई०भा०३)

१०. आत्महन: आत्मानं घ्नन्तीत्यात्महन:। के? ते जना: सेऽविद्वास । कथं ते आत्मानंनित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात्। विद्यमानस्यात्मनो यत्कार्यं फुलमजरामरत्वादिसंवेदनादिलक्षणम्, तत् हतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जना आत्महन इत्युच्यतन्ते । (ई०भा०३)

११. आत्मनो हननादविद्वांस: संसरन्ति, तद्विपर्ययेण विद्वांसो मुच्यन्ते। (ई०भा०४)

१२. इह देहस्थस्य मनसो ब्रह्मलोकादिदूरस्थसिङ्कल्पनं क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोकप्रसिद्धम्। (ई०भा०४)

१३. सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सत्। उपाधिकृता: सर्वा: संसारविक्रिया अनुभवतीवाविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत। (ई०भा०४)

१४. सर्वा हि कार्यकरणविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्ति। (ई०भा०४)

१५. अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदु सर्वस्य अस्य बाह्यतो व्यापित्वादाकाशवन्निरतिशयसूक्ष्मत्वादन्त:। (ई०भा०५)

१६. सर्वभूतेषु चात्मानं निर्विशेषं यस्त्वनुपश्यति स: ततस्तस्मादेव दर्शनान्न विजुगुप्सते विजुगुप्सां घृणां न करोति। (ई०भा०६)

१७. सर्वा हि घृणा आत्मनोऽन्यदृष्टं पश्यतो भवति। आत्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानितिमित्तम्। (ई०भा०६)

१८. शोकश्च मोहश्च कामकर्मबीजमजानतो भवति, न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यमत:। (ई०भा०७)

१९. आत्मा पर्यगात्परि समन्तादगाद्गतवानाकशवव्द्यापी। (ई.भा.८)

२०. य नित्यमुक्त ईश्वरो याथातथ्यत: सर्वज्ञत्वाद्यथातथाभावो याथातथ्यं तस्माद्यथाभूतकर्मफलसाधनतोऽर्थान् कर्तव्यपदार्थान् व्यदधाद्विहितवानृ यथानुरूपं व्यभजत्। (ई.भा.८))

२१. न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात्। (ई.भा.९)

२२. देवताज्ञानेनामृतं देवतात्मभावमश्नुते। (ई.भा.१०)

२३. विद्यां कामकर्मबीजभूतामदर्शनातत्कामुपासते ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति।(ई.भा.१२)

२४. सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम्। (ई.भा.१५)

२५. परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः। (ई.भा.१८)

२६.. विद्योत्पत्तविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः। (ई.भा.१८)

- ४/९,१०, डब्बल स्टोरी
विजय नगरम्,
नव देहली - ११०००९

# व्यर्थजिज्ञासा

- राहुल कौशिकः

नेकबारं मनुष्यस्य हृदये व्यर्थजिज्ञासाः उत्पन्नाः भवन्ति, एतद्कारणं सः तस्य अमूल्यसमयं नष्टं करोति।

एकदा बुद्धस्य समीपे तस्य एकः शिष्यः आगत्य प्रष्टवान्- 'प्रभु!' मृत्योपरान्त पूर्णं ज्ञानी भवति न वा?

**श्रुत्वा बुद्धः अवदत्**- 'यदा अहं भिक्षु आसम् तदा किमहम् उक्तवान् यत् त्वं ममेव शिष्यः भव ?

'न', शिष्य अवदत्।

**बुद्धः पुनः उक्तवान्**- 'यदा कस्यापि दुर्घटनायां क्षति भवति, रक्तं प्रवहति तर्हि यदि स एवं वदति यत् ''दुर्घटना कः कृतवान्?'' तर्हि तस्य किं भविष्यति पुत्रः?

**शिष्यः अवदत्**- 'अवश्यमेव तस्य स्वास्थ्यं असम्यक् भविष्यति अथवा तस्य मृत्यु अपि भवितुं शक्नोति।

**श्रुत्वा बुद्धः अवदत्**- 'सम्यक्, परन्तु दुर्घटनायां काऽपि कारणं नास्ति। दुर्घटनायाः कारणं सः स्वयमेव अस्ति। यतः स व्यर्थहटं करोति। एवमेव त्वमपि किमर्थं व्यर्थजिज्ञासां प्रगाटयति? यत् अहं किमपि प्रगटं कृतवान् तमेव जानातु तथा आचरणे स्थापयतु, एतावत् भ्वतः कल्याणं भविष्यति। यत् अहं प्रगटं न कृत्तवान्, तत् विषय प्रगटं करणस्य किमपि आवश्यकता नास्ति।

शिष्यः ज्ञातवान् तथा स्वस्य कार्ये लीनः जातः।

- जैनदर्शनविभागः
श्री ला० ब० शा० रा० सं० वि०
कटवारिया सराय
नव देहली-११००१६

# आगच्छ त्वं पठनम्

- मोती प्रसाद साहू

आगच्छन्तु ग्रामबालिका:!
आगच्छन्तु ग्रामबालका:!
चलाम मिलित्वा विद्याभवनं
ग्रहणं विद्या दानम्।
ग्रहणं विद्या दानम्।।
ग्रामे ग्रामे विद्याभवनं
यत्र मिलति नि:शुल्कं ज्ञानं
नवानि पुस्तकानि प्रतिवर्षं
शुल्केन विना परिधानम्।
शुल्केन विना परिधानम्।।
कन्याधनं सुलभो बालाभ्य:
छात्रधनं निर्धनेभ्य:
सर्वकारेण नियुक्तशिक्षका:
विषये विषये निष्णातम्।
विषये विषये निष्णातम्।।
मध्याह्ने मिलति व्यंजनं
ओदनद्विदलं हरितं शाकं
कुरुत मिलित्वा सखिभि: संगे

भूत्वा गोलाकारम्।
भूत्वा गोलाकारम्।।

गृहे गृहे कथयन्ति बालिका:
गमिष्याम्यहं विद्यापठनं
जननी आनय मम गणवेशं
मा अवरोधय गृहकार्यार्थम्
गृहकार्यार्थम्।।
धावन्तीं गच्छन्ति बालिका:
बालका: अति मन्दम्
नादन्तीं घण्टिका कथयति
आगच्छ त्वं पठनम्।
आगच्छ त्वं पठनम्।।

## तनय: तनया

यदि तनयोऽस्ति भूधरशिखर:
तनया तु नद्या: जलम्
भवति भूधर: एकस्थाने
सरिता प्रवहति सिंधु तलम्।
पुत्र: चुम्बति गगनं नित्यं
तनया भंजति क्लेशं
शिखर: संचति जलं हिमरुपे

सरिता सिंचति तृषितं कण्ठं
शुष्कं क्षेत्रं उपवन वृक्षं।
तादृशी कन्या कुलयोर्मध्ये
आवागमनेन वितरति स्नेहं
सिंचति स्नेहं ददाति स्नेहं।

– रा० आ० इ० का0हवालबाग: अल्मोड़ा
उत्तराखण्ड:-२६३६३६

# ध्यानस्य लाभानाञ्च विवेचनम्

-विवेक शर्मा

समस्तपौरणिकावाङ्मये विविधविद्यानाम् उपलब्धिः प्रचुरमात्रायां भवति। एतस्मिन् पुराणसाहित्ये कालिकापुराणनामकमुपपुराणं राराजते। कालिकापुराणे प्रचुरमात्रायां देवीदेवतानां पुजनं स्तुतयः च वर्तन्ते यत्र तेषां विभिन्नरूपानां वर्णनमुपलभ्यते। अनेन सार्धमेतेषु वर्णनेषु दार्शनिकविषयाः अप्युत्कृष्टरीत्या समाविष्टाः। शाक्तोपपुराणेषु कालिकापुराणं महत्त्वपूर्णं प्रमुखाञ्चोपपुराणमस्ति। कालिकापुराणे ध्यानविधिः विस्तरेण वर्णितः।

**ध्यानविधिः**- कालिकापुराणानुसारं ध्यानस्य चिन्तनस्य वाऽऽदिस्थानं हृदयमस्ति[१]। अथ च कालिकापुराणं निर्दिशति यत् हृदयस्थां देवीं मनसापि ध्यायेदिति[२], इत्युक्ते ध्यानावसरे हृदयेन मनोऽपि योजनीयम्। अत एव वर्णितञ्चोपपुराणेऽस्मिन् यद्योगिनः स्वान्तःकरणे भगवतः चिन्तनं कुर्वन्ति[३]। ध्यानं कदापि सद्य एव नाऽरभ्येत, तस्मिन् पूर्वसज्जाऽपेक्षिता वर्तते। योगदर्शनानुसारमष्टाङ्गानां क्रमशः प्रतिपादनं करणीयं भवति। श्रीमद्भागवतेऽपि वर्णितं यत् प्राणायामादिभिः दोषाणां परिमार्जनं पूर्वं भवेत[४]। तदनन्दरं यदा मनः स्थिरं भवति तस्मिन् समये ध्यानानुष्ठानं करणीयम्[५]। ध्यानावसरे प्राणायामं चरेदिति निर्दिशति कालिकापुराणकारः[६]। अपि च कालिकापुराण वर्णितं यत् ध्यानार्थं महादेवेन पूर्वं मनसः निग्रहः कृतः[७]। निदिष्टञ्चोपपुराणेऽस्मिन् यत् नयनद्वयं निमील्य, शिरं ग्रीवां च स्थिरं कृत्वा स्थिरमनसा ध्यानं समारभेत[८]। ध्यानं कीदृशं भवेदित्यस्मिन् विषये कालिकापुराणकारः निर्दिशति यत् सर्वप्रथमं नित्यार्जवत्वमित्युक्ते स्वभावे

सरलताऽत्यावश्यकी वर्तते। अथ च कथितं यत् व्ययहीनो भूत्वा ध्यानं करणीयम्, इत्युक्ते क्षयाभावेन समत्वरूपेण ध्यानमनुष्ठेयम्[९]। ध्यानविधिप्रतिपादनप्रसङ्गे श्रीमद्भागवतस्य निर्देशोऽस्ति यत् ध्यानमथवा मनः अन्तरात्मनि न्यसेत् स्थापयेद्वा[१०]। एवमेवोपपुराणेऽस्मिन्नपि वर्णनभुपलभ्यते यत् शिवः ध्यानेन आत्मानमात्मना विशेषतः द्रष्टुं यन्तमकरोत्[११]। कथितञ्चोपपुरणेऽस्मिन् यत् शिवः ध्यानावसरे साधकः अन्तरात्मन्येव पश्येत्, ध्यानप्रक्रियायां बाह्यं किमपि न निरीक्षेत[१२]। उपपुराणस्यास्यान्यस्मिन् स्थले वर्णितं यत् महादेवः स्वस्य ज्ञानमयस्य नित्यस्य च स्वरूपस्य चिन्तनं ध्यानावसरे एकाग्रतयाऽकरोत्[१३]। अथ च त्रिपञ्चाशत्तमेऽध्याये प्रतिपादितं यत् अम्बिका ध्यानावसरे सोऽहमेवेति चिन्तयति[१४]। अत एव ध्यानविधौ 'सौऽहं' चिन्तनीयमिति कालिकापुराणकारस्य मतम्।

ध्यानं तु एका अनवरतप्रक्रिया वर्तते। कालिकापुराणस्याभिमते ध्यानाय कामविकारः न श्रेयस्करः यतो हि कामेन ध्यानप्रक्रियायां विघ्नमायाति। अत एवोपस्थापितञ्चोपपुराणेऽस्मिन् यत् पार्वतीं मुहुर्मुहुः दृष्ट्वा शिवेन ब्रह्मचिन्तनं ध्यानञ्च विस्मृतम्[१५]। अथ च वर्णितमस्ति यत् कामविकारस्यागते सत्यात्मचिन्तनं विहारय वृषध्वजः सत्याः चिन्तने रतः जातः[१६]।

अपि च कालिकापुराणकारः साधकेभ्यः निर्दिशति यत् ध्यानं ध्येयविषयात् कदापि न त्यजेत्[१७]। अथ चोत्तमासनस्योपर्युपविश्य एकाग्रमनसा ध्यानं करणीयमिति कालिकापुराणकारस्य मतम्[१८]।

योगदर्शने बन्धानां विशेषमहत्त्वं वर्तते। पातञ्जलयोगप्रदीपे मूलबन्धउड्डीयानबन्ध -जालन्धरबन्ध-महाबन्धादीनां सविस्तरं चर्चा कृताऽस्ति[१९]। कालिकापुरणे महादेवस्य ध्यानविधेः प्रक्रिया दर्शिता, यस्यानुसारं शिवः बन्धरूपात्मकं पर्यङ्कमाश्रित्य निमीलितलोचनाभ्यामात्मस्वरूपस्य चिन्तनमकरोत्[२०]।

कालिकापुराणे वर्णितं यत् महादेवः स्वचित्तं ध्याने स्थापितवान्[२१]। वस्तुतः कालिकापुराणस्याध्ययनेन ज्ञायते यत् ध्यानावसरे मनोनिग्रहः अनिवार्यः, यतो हि मनः ध्याने संस्थाप्य महादेवस्याऽराधनायाः उल्लेखः एकपञ्चाशत्तमेऽध्याये उपलभ्यते:।[२२] कथितञ्चोपपुराणेऽस्मिन् यत् ध्यानमार्गस्थमनः यदि ब्रह्मण्यर्प्यते चेत् मनः भ्रष्टं कथमपि भवितुं न शक्नोति[२३]। कालिकापुराणस्याभिमते ध्यानं मौनैन सह भवति, अत एव संहारकथनमित्यस्मिन्नध्याये उल्लिखितं यत् ध्यानासक्तं मौनिनञ्च महादेवं प्रणम्य इन्द्रादयः देवाः स्वस्थानमगच्छन्[२४]। अस्मादुपपुराणेऽस्मिन्नपांशुजपः सर्वोत्तमः परिकीर्तितः[२५]।

ध्यानाय शान्तवातावरणस्योपादेयतां प्रतिपादयत्युपपुराणमिदं यत् ध्यानस्थं महादेवं दृष्ट्वा प्रमथादयः गणाः अपि ध्यानतत्पराः अभवन्[२६], एवञ्च शिवस्य ध्यानावधिपर्यन्तं तैः किमपि न कूजितम्[२७]। एवमेव महादेवः हिमालयं प्रति निवेदयति यदहं ध्यानार्थमत्र निर्जनक्षेत्रे (एकान्ते वा) आगतोऽस्मि, अतः मम निकटे न कश्चिदपि समागच्छेत्[२८]। अथ प्रतिपादितमुपपुराणेऽस्मिन् यत् निर्विघ्नस्थाने द्विजैः ध्यानं तपश्च क्रियते[२९]।

कालिकापुराणस्याध्ययनात् ध्यानविषये महत्त्वपूर्णं तथ्यं ज्ञायते यत् ध्यानं सर्वदा निराकाङ्क्षी भूत्वा एव क्रियते, यतो हि वर्णितमुपपुराणेऽस्मिन् यत् महादेवः पत्नीसम्बद्धाऽकाङ्क्षामपि परित्यज्य ध्यानमकरोत्[३०]।

कालिकापुराणस्य निर्देशोऽस्ति यत् कस्यामपि स्थितौ ध्यानं कदापि न त्यक्तव्यम्। यथा वर्णितञ्चोपपुराणेऽस्मिन् यत् पार्वती कठोरतपसा कृशाङ्गी जाता[३१]। तथापि तस्यामपि स्थितौ सा शम्भोः चिन्तने एव रताऽऽसीत्। विपरीतपरिस्थितावप्यनवरतशिवचिन्तनेन सा मुनीनपि अजयत्[३२]। एवमेव एकपञ्चाशत्तमेऽध्याये वशिष्ठेन स्पष्टया प्रतिपादितं यत् ध्यानमिति वस्तुतः एका दीर्घा प्रक्रिया वर्तते, क्षणात्मकेन ध्यानेन महादेवः तुष्टः न भवति कदापि[३३]।

**ध्यानस्य लाभाः**– ध्यानस्य लाभाः अपि कालिकापुराणे विस्तरेण प्रतिपादिताः वर्तन्ते। श्वेताश्वतरोपनिषदि ध्यानविधिप्रसङ्गे निर्दिष्टं यत् यथा मृदयोपलिप्तं पिण्डं शोधनेत्यादिभिः क्रियाभिः तेजोमयं भविता तथा ध्यानेन शरीरं तेजोमयं भवति[३४]। एवमेव कालिकापुराणेऽपि वर्णितं यत् तत्त्वचिन्तनात् महादेवस्य शरीरं तेजार्भिरुज्जवलं जातं यस्य साक्षात्करणे मुनयः अपि असमर्थाः आसन्[३५]। अपि च सुर्यवत् प्रदीप्तशरीरं वीक्षितुं समीपस्थाः शिवगणाः असमर्थाः आसन्[३६]। अतः ध्यानेन तेजस्त्वं प्राप्यते इति कालिकापुराणस्य मतम् कथितञ्चोपपुराणेऽस्मिन् यतृ भगवतः साक्षात्कारं योगिनः ध्यानस्थाः भूत्वा कुर्वन्ति[३७]। एवमेव एतस्मिनन्नेव प्रसङ्गे वर्णितं यत् योगिनः ध्यानेन भगवन्तं चिन्तयन्ति[३८]। ध्यानेन चिन्तानां निरासः भवति, अत एव वर्णितमस्मिन्नुपपुराणे यत् ध्यानासक्तस्य शिवस्य मनसि न कापि चिन्ता व्यजायत[३९]। ध्यानेन लौकिकजगतः आभासः एव न भवत्यपितु तदाकरोऽपि न भवतीति कालिकापुराणस्य मतम्, अत एव कथितं यत् ध्ययानपरः शिवः कालीं पश्यन्नपि न पश्यति।[४०] कालिकापुराणस्याभिमते ध्यानस्थो यो भवति तस्मिन् कामभावस्य उत वा इच्छानामाविर्भावः कदापि न भवति, प्रसङ्गेऽस्मिन् वर्णितं यत् यद्यपि गिरिराजस्य रूढयौवना त्रिलोकश्रेष्ठा च सुता (भगवती पार्वती) महादेवस्य पुरतः एवाऽऽसीतृ तथाऽपि हरः तां न कामयति[४१]। ध्यानमार्गेण साधकः निश्चलस्थितिं प्राप्नोतित्युपपुराणस्यास्य मतम्[४२]। अथ च ध्यानस्य लाभविषये स्पष्टतया प्रतिपादितं यत् ध्यानमात्रेणैव नारसप्राप्नोति[४३]।

**सन्दर्भ ग्रन्थ–**

कालिकापुराणम्, सम्पादक–आचार्य मृत्युञ्जय त्रिपाठी, नवशक्ति प्रकाशन चौकाघाट, वाराणसी, प्रथम संस्करण २००८

योग–दर्शन , गीताप्रेसगोरखपुरम्, संवत् २०६७

पातञ्जलयोगप्रदीप, श्रीस्वामी ओमानन्दतीर्थः, गीताप्रेसगोरखपुरम्, विक्रमी संवत् २०७२

उपनिषत् समुच्चयः, प० भीमसेन शर्मा, हरियाणा साहित्य संस्थान, गुरुकुल झज्जर, प्रथम संस्करणम् २०००

ईशादि नौ उपनिषद्(६६), हरि कृष्ण गोयन्दका, गीताप्रेसगोरखपुरम् विक्रमी संवत् २०६८

श्रीमद्भागवत-पुराणम्, व्यासः, गीताप्रेसगोरखपुरम्, विक्रमी संवत् २०६८

**- सहायकाचार्य, संस्कृत विभाग,**
**हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय**
**धर्मशाला, तहसील-धर्मशाला, जिला-काङ्गडडा**
**हिमाचल प्रदेश-१७६२१७**

# श्रीमद्भगवद्गीतायां योगविज्ञानस्य स्वरूपविमर्शः-

-गोविन्ददासः

**गीताशास्त्रपुराण तत्त्व जननी धर्मद्रुमोल्लासिनी।**
**वेदान्तोपनिषद्रहस्यमवनी ज्ञानाम्बुकुल्लोलिनी॥**
**गीताकापिलसांख्ययोग भगिनी निष्कर्मविद्योतिनी।**
**भक्ति-ज्ञानविराग कर्म मथनी सत्कर्म सम्बोधिनी॥[१]**

श्रीमद्भगवद्गीता दार्शनिकदृष्ट्या परमोत्कृष्टं परमप्रामाणिकं योगशास्त्रम् वर्तते। सर्वासां समस्यानां समाधानं श्रीमद्भगवद्गीतायां दरीदृश्यते इति कथने न काऽपि अतिशयोक्तिः। अपि च सर्वासामपि उपनिषदां सारभागं अर्थात् अखिलश्रुतिसारं सर्व वेदान्तसारं श्रीमद्भगवद्गीता वर्तते। ग्रन्थोऽयं पञ्चमवेदस्वरूपस्य महाभारतस्य अंशभूतः वर्तते। भारतीयदार्शनिकपरम्परायां सांख्ययोगदर्शनयोः सिद्धान्तानां वैशद्येन विवेचनात् प्रतिपादनाच्च दर्शनसारसंग्रहोऽप्यत्रोपलभ्यते। वेदान्तदर्शन-प्रतिपादितस्य तत्त्वमसीति महावाक्यस्याप्त्रोपलम्भाद् वेदान्तावगाहित्वमप्यस्य लक्ष्यते। सेयं सरलया भावाभिव्यक्ति-प्रक्रियया, भूयिष्ठयाऽर्थगभीरतया, साधिष्ठया योगसाधनादीक्षया, वरिष्ठयाऽऽत्मविशुद्धि-शिक्षया सर्वस्यापि लोकस्यादृतिमनुभवति। श्रीमद्भगवद्गीतायां पदे-पदे योगशब्दस्य प्रयोगो विहितः। योगी, योगः, मुक्तयोगी इति शब्दानां स्वरूपं परिभाषा वा परिभाषिताः सन्ति। तत्र भिन्ने-भिन्ने अर्थे योगः उपदिष्टः। श्रीमद्भगवद्गीतायां एकचत्वारिंशद्वारं योगशब्दस्य स्वतन्ततया प्रयोगो दृश्यते। योगशब्दस्य निर्वचनं योगिनां लक्षणमपि तत्र तत्र तत्तसन्दर्भानुरूपेण भगवतैव दत्तम्। यथा- 'योगः कर्मसु कौशलम्'[२], 'समत्वं योगमुच्यते'[३] इत्यत्र त्यागोपेतं

समत्वमेव योगशब्दार्थ इति व्याचष्टे। समत्वं नाम चित्तसमाधानरूपमिति भगवद्रामानुजाचार्यः निरूपयति। तेन च योगशास्त्रे प्रसिद्धस्यैव अर्थस्य ग्रहणं न तु परिभाषा-कल्पनमिति तस्याशयः। 'योगस्थ कुरु कर्माणि', ''योगसंन्यस्तकर्माणम्''[४] तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन। यं सन्यासमिति प्राहुः योगं तं विद्धि पाण्डवः।[५]

भारतीयायाः संस्कृतेः गीतायोगशास्त्रस्य नितरां महत्वमस्ति। गीतायाः योगविज्ञानं सर्वजनहिताय सर्वजनसुखाय सर्वजनबोधाय योगस्य महत्त्वं प्रतिपदमालक्ष्यते। योग एव भारतीयसंस्कृतेः सनातनधर्मस्य प्राणभूतो वर्तते।

**योगस्वरूपम्** -

युजिर् योगे इति धातोः कर्तरि घञ् प्रत्ययेन निष्पन्नस्य योगशब्दस्यार्थः संयोगः। करणे घञ् तु तदर्थो मेलको भवति। तथा च नर-नारायणयोः संयोगः, एकीकरणसामग्री वा योगशब्दस्यार्थः। क्रियात्मकदृष्ट्या साधनस्यैव नाम योगः। एवञ्च नरस्य नारायणेन सहैक्यसंपादनाय यत्साधनमुपदिष्टं तदेव नाम योग। वस्तुतो योगशब्दः एकाग्रतार्थकाद् युज् समाधौ इति धातोरेव निष्पद्यते। ततो हि अष्टांगयोगेषु नियमतः चित्तस्यैकाग्रता अपेक्षिताऽस्ति। युज्यते समाधत्तेऽनेनेति करणव्युत्पत्या साधितस्य योगशब्दस्य नरस्य नारायणेन सह सह सम्बन्धे सहायकत्वाद् योगस्य अष्टांगयोग एवार्थः। भावव्युत्पत्त्या निष्पन्नस्य योगशब्दस्य मुख्योऽर्थ जीवस्य ईश्वरेण सह संयोग एव योग । योगसूत्रकारेण योगस्वरूपं प्रतिपादितम्-योगश्चित्तवृत्तिनिरोधः।[६] चित्तवृत्तीनां निरोधेनैव योगस्य संसिद्धिः। अस्याम् अवस्थायां जीवः स्वरूपम् अधितिष्ठति। श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णः कथयति- **''यत्रोपरमते चित्तं निरुद्धं योगसेवया''**[७] इति।

श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन दुःखसंयोगनिवृत्त्यर्थं योगस्य ज्ञान-विज्ञानं, योगाभ्यास एव उपादेयः , तेन च योगयुक्तेन भाव्यम् इति उपदिष्टम्। श्रीमद्भगवद्गीतायां योगिराजश्रीकृष्णस्य मुखात् विनिःसृष्टाऽऽस्ते-

**व्यासप्रसादात् श्रुतवान् एतद्गुह्यमहं परम्।**
**योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम्।।**[८]

योगविद्या परमपदप्रदायनी। गीतादर्पणे स्वामिश्रीरामसुखदासमहाराजः कथयति यत् सर्वे मानवाः प्रभुप्राप्त्यधिकारिणः सन्ति। श्रीमद्भगवद्गीतायां कर्मयोगस्य, ज्ञानयोगस्य, भक्तियोगस्य, च समानता वर्तते। तद्यथा-

**त्रयो हि योगा सुगमा वरिष्ठाः, सिद्धिप्रदाः पापनिवारकाश्च।**
**तुष्टिप्रशान्तिप्रदसाम्यदाश्च, ज्ञानाच्छदातार उदीरिताश्च।।**[९]

योगस्य वैशिष्ट्यं श्रीमद्भगवद्गीतायां स्थाने-स्थाने च योगिराजश्रीकृष्णेनोक्तम्-

**योग युक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।**
**सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते।।**[१०]

योगेति। योगेन युक्तोद्वैतदर्शनेवस्थितो विशुद्धात्मा निर्मलीकृतबुद्धिर्विजितात्मा जितमनोवृत्तिरत एव जितेन्द्रियः सर्वभूतानात्मभूत आत्मा यस्य सोयं कुर्वन्नपि न लिप्यते। कर्मापि ब्रह्मरूपेण भाव्यमानममृतत्वाय कल्पते। नहि तत्र लेपशक्तिरस्तीति। यदि योगसुखं स्यात्ततो विषयसुखपरित्यागो युज्यते। अन्यथा को नाम परित्यजेदित्याह-

**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।**
**उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्।**[११]

प्रशान्तमनसम् आत्मनि निश्श्चलमनसं तत एव हेतोः दग्धाशेषकल्मषं तत एव शान्तरजसं विनिष्टरजोगुणं तत एव ब्रह्मभूतं स्वस्वरूपेणावस्थितम्, एनं योगिनम् आत्मानुभवरूपम् उत्तमं सुखम् उपैति, हि इति हेतौ, उत्तमसुखरूपम् उपैति इत्यर्थः।

सम्प्रति जगदिदं कर्मप्रधानम्। संसारबन्धनस्य मोक्षस्यापि च कारणमस्माकं कर्म एव। अस्मिन् लोके सर्वे जनाः कर्मकरणे विवष्ठाः स्वतन्त्राष्ठचापि सन्ति। तद्यथा-

न हि कश्चितक्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥[१२]

न हि अस्मिन् लोके वर्त्तमानः पुरुषः कश्चित् कदाचिद् अपि कर्म अकुर्वाणः तिष्ठति। 'न किञ्चित्करोमि' इति व्यवसितः अपि सर्वः पुरुषः प्रकृतिसमुद्भवैः सत्त्वरस्तमोभिः प्राक्तनकर्मानुगुणं प्रवृद्धैः गुणैः स्वोचितं कर्म प्रति अवशः कार्यते प्रवर्त्यते। अत उक्तलक्षणेन कर्मयोगेन प्राचीनं पापसञ्चयं नाशयित्वा गुणांयश्च सत्त्वादीन् वशे कृत्वा निर्मलान्तःकरणेन सम्पाद्यो ज्ञानयोगः। अतिशयितपुरुषार्थनिष्ठया योगिनः सर्वस्माद् सर्वश्रेष्ठं उक्तमस्ति। तद्यथा-

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि यतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवाजुर्न॥[१३]
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥[१४]

केवलतपोभिः यः पुरुषर्थः साध्यते आत्मज्ञानव्यतिरिक्तैः ज्ञानैः च यः, यः च केवलै अश्वमेधादिभिः कर्मभिः, तेभ्यः सवेभ्यः अधिकपुरुषार्थसाधनत्वात् योगस्य तपस्विभ्यः ज्ञानिभ्यः कर्मिभ्यश्च अधिको योगी तस्माद् योगी भव अर्जुन। 'कर्मण्येवाधिकारस्ते' इति भगवता अर्जुनं प्रति कर्मयोगे एवाधिकारः प्रदर्शितः। तद्यथा-

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥[१५]
योगस्था कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥[१६]

अर्थात् यत्किमपि कर्म कश्चित् कुर्यात् तत् पूर्णं स्यात् अपूर्णं वा, साफल्यं लभेत असाफल्यं वा सर्वासु अवस्थासु समभावेन भवनं समत्वयोगो निगद्यते। कार्यकारणस्य

एषोऽपि विधिः कल्याणकारः। 'समत्वयोग' एव 'बुद्धियोगः' कथ्यते। समलोष्टाश्मकाञ्चनो योगी 'युक्त' इत्युच्यते-

**ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।**
**युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनाः॥**[१७]

इत्यत्र ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानम्, विज्ञानम्, शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणम्, ताभ्यां तृप्त आत्मा अन्तःकरणं यस्य स ज्ञान-विज्ञानतृप्तात्मा इत्यर्थो भवति। ज्ञान-विज्ञानयोगस्य चर्चा श्रीमद्भगवद्गीतायां विशद्रूपेण प्रतिपादितं वर्तते। गीतायां ज्ञान-विज्ञानयोगात्मके सप्तमोऽध्याये , राजविद्यागुह्ययोगात्मके च नवमेऽध्याये भगवान् ज्ञानविज्ञानस्य स्वरूपं वर्णितम् इति । श्रीमदभागवतपुराणेऽपि प्रतिपादितम्- "**तदविजानीहि यज् ज्ञानमात्मतत्त्वं निदर्शनम्**"[१८]इति। एवं हि भगवान् यथा कण्ठवरेण ज्ञानस्वरूपं प्रतिपादयामास न तथा विज्ञानस्वरूपम्। भगवान् श्रीकृष्णेनोक्तं-

**ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।**
**यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥**[१९]

इति व्याचक्षाणैरार्यैः ज्ञानम्=आत्मज्ञानम्, अव्यक्तस्वरूपज्ञानम्, तथा विज्ञानम्= विविधसृष्टिज्ञानम्, व्यक्तस्वरूपज्ञानमिति प्रतिपाद्यते। आत्मतत्त्वस्य अव्यक्तस्य ज्ञानार्थम् व्यक्तस्य ज्ञानमावश्यकम् भवति, अत एवं भगवता सविज्ञानं ज्ञानं प्रतिपाद्यते। अस्य तात्पर्यं भगवतो निर्गुणनिराकारतत्त्वस्य प्रभावमाहात्म्यादेर्यथार्थज्ञानम्- 'ज्ञानम्' तथा सगुणसाकारतत्त्वस्य प्रभावमाहात्म्यादेर्यथार्थज्ञानम् 'विज्ञानम'।[२०] भगवान् श्रीकृष्णेनोक्तं-

**इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।**
**ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥**[२१]

श्रीमदभागवतपुराणेऽपि प्रतिपादितम्-"ज्ञानं परमगुह्यं मे यद् विज्ञानसमन्वितम्"[२२] भक्तिकर्मयोगयोः ज्ञानसाधनत्वं ज्ञानस्यैव साक्षात् मोक्षसाधनत्वं च श्रीमद्भगवद्- गीतावाक्ये सिद्ध्यति। तद्यथा-

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥
श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥[२३]

'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा' इत्यादिभिः नैकैर्वाक्यैः भक्तिकर्माणोः परम्परासाधनत्वं ज्ञानस्य साक्षात् साधनत्वं च प्रतिपादितम्।

योगिनामपि सर्वेषां मद्‌गतेनान्तरात्मना।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥[२४]

श्रीमद्‌भगवद्‌गीतायाः षष्ठाध्याये 'शुचौ देशे' इत्यारभ्य आसनादीनां योगसाधनानां निरूपणं कृत्वा इन्द्रियनिग्रहेण योगाभ्यासविधिं वर्णयन् तत्फलभूतां मनस्संयमनजनितां मुक्तावस्थां वर्णयति। तद्यथा-

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥[२५]
युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते॥[२६]

मनोनिग्रहसम्पन्नः योगी उक्तक्रमेण मनसः 'आत्मानं युञ्जन्' इत्यस्य परमात्मानं ध्यायन्निति,तेन एव विगतप्राचीनसमस्तकल्मज़ः ब्रह्मसंस्पर्शं ब्रह्मानुभवरूपं सुखं अत्ययतम् अपरिमितं सुखेन अनायासेन सदा अश्नुते। योगी तपस्विभ्यो ज्ञानिभ्यः कर्मिभ्यश्चाप्यधिको भवति। भगवच्चरणारविन्देषु समर्पितात्मा योगी युक्ततमः कथ्यते। तद्यथा-

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धयापरयोपेतास्ते मे युक्ततमा मताः॥[२७]

भक्तियोगेनैव साधकः गुणातीतो भवितुमर्हति-

**मां च योऽव्यभिचारेण भक्तियोगेन सेवते।**
**स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते॥**[२८]

श्रीमद्भगवद्गीतायां योगेनसह समग्रनीरोगितायाः (Holistic Health ) अवधारणा बहुचर्चिता। अत्यशनानशने योगविरोधिनी, अतिविहारौ च तथातिमात्रस्वप्नजागर्ये तथा च अत्यायासानायासौ। अतः कल्याणकामिनरेण शारीरिकमानसिक विकासाय उपयोगि आहारमेव कर्तव्यम्। पुष्टिकारकं सात्त्विकं शौचविधिना च सिद्धमेव आहारं भक्षणीयम्। तदर्थं मिताहारविहारस्य मितायासस्य मितस्वप्ननावबोधस्य सकलदुःखहा बन्धनाशनो योगः सम्पन्नो भवति। तद्यथा-

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वपनावबोधस्य योगो भवति दुःखहा॥**[२९]
**तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्।**
**स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा॥**[३०]

एवं सर्वदा योगाभ्यासं विगतकल्मषो भूत्वा योगी अनायासेन ब्रह्मप्राप्तिरूपं निरतिशयं सुखं प्राप्नोति। योगिनां स श्रेष्ठोयोगी भवति, यः आत्मौपम्येन सर्वत्र समं पश्यति अर्थात् दुःखं सुखं वा सर्वेषु प्राणिषु समं पश्यति। यद्यपि श्रीमद्भगवद्गीताः सर्वे अष्टादशाध्यायाः अष्टादशयोगगानाम्- अर्जुनविषादयोगस्य, सांख्ययोगस्य, कर्मयोगस्य, आत्मसंयमयोगस्य, ज्ञानकर्मसंन्यासयोगस्य, कर्मसंन्यासयोगस्य, ज्ञानविज्ञानयोगस्य, अक्षरब्रह्मयोगस्य, राजगुह्ययोगस्य, विभूतियोगस्य, विश्वरूपदर्शनयोगस्य, भक्तियोगस्य, क्षेत्रक्षेत्रज्ञविभागयोगस्य, गुणत्रयविभागयोगस्य, पुरुषोत्तमयोगस्य, देवासुरसंपद्विभागयोगस्य, श्रद्धात्रयविभागयोगस्य, मोक्षसंन्यासयोगस्य चेति पृथक् पृथक निरूपणं कुर्वन्ति।

**शैक्षिकनिहितार्थः-**

योगः सा आध्यात्मिकविद्या वर्तते या जीवात्मानं परमात्मना संयोगस्य प्रक्रियां प्रदर्शयति। योगः केवलं जीवनदर्शनस्य जीवनपद्धतिः एव नास्ति। अपितु योगः आत्मानुशासनम्

अपि वर्तते। योग: व्याधिमुक्तं वा समाधियुक्तजीवनस्य संकल्पना वर्तते। योगी योगसाधनतया चित्तशुद्धिं कुर्वाणः ज्ञानविज्ञानस्य क्षेत्रं विकासयन् गच्छति । अस्यैव फलस्वरूपेण तस्मै प्रज्ञालोकस्य प्राप्तिर्जायते। अनेनालोकेन सहैव ऐश्वर्याणि उदितानि भवन्ति। यथा सूर्योदये जाते सति प्रकाशोष्णते युगपदेव जायते। वेदानां रहस्यं योगिभिरेव ज्ञातुं शक्यम्। यथोक्तम् उत्तरगीतायाम्-सारस्तु योगिभिः पीतः तक्रमनन्ति पण्डिताः। ये जनाः यमनियमानां पालने दृढा न सन्ति तथा यस्य सिद्धगुरोः सानिध्यमेवं अहंकारनाशो न भवति। श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णेनोक्तं-

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥**[३१]

अतः योगानुशीलनेन व्यक्तौ श्रद्धा-सदाचारबोधः, मिताहारशीलं-अन्तःशुद्धिर्बहिर्शुश्च आधर्मात् निवृतिः विषयनिष्टेकाग्रता-शारीरिकमानसिकपीडोपशमनः कर्मणि कुशलतादिकं च उपलभ्यते। उक्तञ्च भगवता श्रीकृष्णेन श्रीमद्भागवद्गीतायां-

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥**[३२]

●●●●●

**सन्दर्भाः** -


1. पं.श्रीमधुसूदनओझा, श्रीमद्भगवद्गीता, राजस्थान ग्रन्थ अकादमी
2. श्रीमद्भगवद्गीता 2/50
3. श्रीमद्भगवद्गीता 2/48
4. श्रीमद्भगवद्गीता 4/41
5. श्रीमद्भगवद्गीता 6/2
6. पा0योग0सू0समाधिपादः 2
7. श्रीमद्भगवद्गीता 6/20
8. श्रीमद्भगवद्गीता 18/75
9. गीतादर्पण,गीताप्रेस,
10. श्रीमद्भगवद्गीता 5/7
11. श्रीमद्भगवद्गीता 6/27
12. श्रीमद्भगवद्गीता 3/5
13. श्रीमद्भगवद्गीता 6/46
14. श्रीमद्भगवद्गीता 6/47
15. श्रीमद्भगवद्गीता 2/47
16. श्रीमद्भगवद्गीता 2/48
17. श्रीमद्भगवद्गीता 6/8
18. श्रीमद्भागवतम् 2/5/1
19. श्रीमद्भगवद्गीता 7/2

20. श्रीमद्भागवतम् 2/5/1
21. श्रीमद्भगवद्गीता 9/1
22. श्रीमद्भागवतम् 2/9/30
23. श्रीमद्भगवद्गीता 4/38-39
24. श्रीमद्भगवद्गीता 6/47
25. श्रीमद्भगवद्गीता 6/15
26. श्रीमद्भगवद्गीता 6/28
27. श्रीमद्भगवद्गीता 12/2
28. श्रीमद्भगवद्गीता 15/26
29. श्रीमद्भगवद्गीता 6/17
30. श्रीमद्भगवद्गीता 6/23
31. श्रीमद्भगवद्गीता 5/34
32. श्रीमद्भगवद्गीता 9/22

**सन्दर्भग्रन्था:** –

**सिलोड़ी, महेशप्रसादः** (2015) सम्पादकः, वैदिकवाङ्मये सांख्ययोगविमर्शः, नवदेहली, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्।

**सरस्वती, स्वामी अखण्डानन्दजी**,(2004)श्रीगीता रस-रत्नाकर, वाराणसी, आनन्दकानन प्रेस।

**उपाध्यायः, सुभद्र**, (1987) सम्पादकः, श्रीमद्भगवद्गीताभाष्यं, श्रीमद्भगवद्गीताः भगवदाशयानुसरणभिधानभाष्यं, वाराणसी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

**गोयन्दका, हरिकृष्णदासः**, (सं0.2062) अनुवादकः, श्रीमद्भगवद्गीता श्रीरामानुजभाष्य, गोरखपुर, गीताप्रेस।

**उन्नी ,वी.एन.दामोदरन्**,(2011)आधुनिकजीवने पञ्चदशाङ्गयोगस्य स्थानं महत्त्वञ्च, संस्कृतमंजरी, शोधपत्रिका नवदेहली, देहली संस्कृत-अकादमी, वर्ष 9 अङ्क 4

**पाठकः, अजयकुमारः**,(2007)योगः कर्मसु कौशलम्, संस्कृतमंजरी, शोधपत्रिका नवदेहली, देहली संस्कृत-अकादमी, वर्ष 6 अङ्क 1

**द्विवेदी ,धनञ्जय वासुदेव**,(2011) श्रीमद्भगवद्गीतां योगचिन्तनम्, संस्कृतमंजरी, शोध पत्रिका नवदेहली, देहली संस्कृत-अकादमी, वर्ष 9 अङ्क 1

**पोद्दार, हनुमान प्रसाद**, (1992) सम्पादक, योगाङ्क, गोरखपुर, गीताप्रेस प्रकाशन।

**-शोधच्छात्रः**
**आधुनिकज्ञानविज्ञानसंकायः ( शिक्षाशास्त्रविभागः )**
**श्रीला०ब०शा०रा०सं०वि० नवदेहली-११००१६**

RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।